# Shri MukambikA Ashtottarashatanamavali

# શ્રીમૂકામ્બિકાયાઃ અષ્ટોત્તરશતનામાવલિઃ

## Document Information

Text title : shrii muukaambikaayaaH aShTottarashatanaamaavaliH

File name : mUkAmbikA108.itx

Category : aShTottarashatanAmAvalI, devii, otherforms, nAmAvalI, devI

Location : doc_devii

Author : Traditional

Transliterated by : R. Harshananda harshanand_16 at rediffmail.com

Description-comments : Mookambika ashtottara namavali

Latest update : April 17, 2002, August 6, 2016

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 18, 2020

*sanskritdocuments.org*

# શ્રીમૂકામ્બિકાયાઃ અષ્ટોત્તરશતનામાવલિઃ

જય જય શઙ્કર !
ૐ શ્રી લલિતા મહાત્રિપુરસુન્દરી પરાભટ્ટારિકા સમેતાય
શ્રી ચન્દ્રમૌળીશ્વર પરબ્રહ્મણે નમઃ !

ૐ શ્રીનાથાદિતનૂત્થશ્રીમહાલક્ષ્મ્યૈ નમો નમઃ ।
ૐ ભવભાવિત ચિત્તેજઃ સ્વરૂપિણ્યૈ નમો નમઃ ।
ૐ કૃતાનઙ્ગવધૂકોટિ સૌન્દર્યાયૈ નમો નમઃ ।
ૐ ઉદ્યદાદિત્યસાહસ્રપ્રકાશાયૈ નમો નમઃ ।
ૐ દેવતાર્પિતશસ્ત્રાસ્ત્રભૂષણાયૈ નમો નમઃ ।
ૐ શરણાગત સન્ત્રાણનિયોગાયૈ નમો નમઃ ।
ૐ સિંહરાજવરસ્કન્ધસંસ્થિતાયૈ નમો નમઃ ।
ૐ અટ્ટહાસપરિત્રસ્તદૈત્યૌઘાયૈ નમો નમઃ ।
ૐ મહામહિષદૈત્યેન્દ્રવિઘાતિન્યૈ નમો નમઃ ।
ૐ પુરન્દરમુખામર્ત્યવરદાયૈ નમો નમઃ ।
ૐ કોલર્ષિપ્રવરધ્યાનપ્રત્યયાયૈ નમો નમઃ ।
ૐ શ્રીકણ્ઠક્લૃપ્તશ્રીચક્રમધ્યસ્થાયૈ નમો નમઃ ।
ૐ મિથુનાકારકલિતસ્વભાવાયૈ નમો નમઃ ।
ૐ ઇષ્ટાનુરૂપપ્રમુખદેવતાયૈ નમો નમઃ ।
ૐ તપ્તજામ્બૂનદપ્રખ્યશરીરાયૈ નમો નમઃ ।
ૐ કેતકીમાલતીપુષ્પભૂષિતાયૈ નમો નમઃ ।
ૐ વિચિત્રરત્નસંયુક્તકિરીટાયૈ નમો નમઃ ।
ૐ રમણીયદ્વિરેફાલિકુન્તલાયૈ નમો નમઃ ।
ૐ અર્ધશુભ્રાંશુ વિભ્રાજલ્લલાટાયૈ નમો નમઃ ।
ૐ મુખચન્દ્રાન્તકસ્તૂરીતિલકયૈ નમો નમઃ ।
ૐ મનોજ્ઞવક્રભ્રૂવલ્લીયુગલાયૈ નમો નમઃ ।
ૐ રજનીશદિનેશાગ્નિલોચનાયૈ નમો નમઃ ।

ॐ કરુણારસસંસિક્તનેત્રાન્તાયૈ નમો નમઃ ।
ॐ ચામ્પેયકુસુમોદ્ભાસિનાસિકાયૈ નમો નમઃ ।
ॐ તારકાભનસારત્નભાસુરાયૈ નમો નમઃ ।
ॐ સદ્રત્નખચિતસ્વર્ણતાટઙ્કાયૈ નમો નમઃ ।
ॐ રત્નાદર્શપ્રતીકાશકપોલાયૈ નમો નમઃ ।
ॐ તામ્બૂલશોભિતવરસ્મિતાસ્યાયૈ નમો નમઃ ।
ॐ કુન્દકુટ્મલસઙ્કાશદશનાયૈ નમો નમઃ ।
ॐ ફુલ્લપ્રવાલરદનવસનાયૈ નમો નમઃ ।
ॐ સ્વકાન્તસ્વાન્તવિક્ષોભિચિબુકાયૈ નમો નમઃ ।
ॐ મુક્તાહારલસત્કમ્બુકન્ધરાયૈ નમો નમઃ ।
ॐ સાષ્ટાપદાઙ્ગદભુજચતુષ્કાયૈ નમો નમઃ ।
ॐ શઙ્ખચક્રવરાભીતિકરાબ્જાયૈ નમો નમઃ ।
ॐ મતઙ્ગજમહાકુમ્ભવક્ષોજાયૈ નમો નમઃ ।
ॐ કુચભારનમન્મઞ્જુમધ્યમાયૈ નમો નમઃ ।
ॐ તટિત્પુઞ્જાભકૌશેયસુચેલાયૈ નમો નમઃ ।
ॐ રમ્યકિઙ્કિણિકાકાઞ્ચીરઞ્જિતાયૈ નમો નમઃ ।
ॐ અતિમઞ્જુલરમ્ભોરુદ્વિતયાયૈ નમો નમઃ ।
ॐ માણિક્યમુકુટાષ્ઠીવસંયુક્તાયૈ નમો નમઃ ।
ॐ દેવેશમુકુટોદ્દીપ્તપદાબ્જાયૈ નમો નમઃ ।
ॐ ભાર્ગવારાધ્યગાઙ્ગેયપાદુકાયૈ નમો નમઃ ।
ॐ મત્તદન્તાવલોત્તંસગમનાયૈ નમો નમઃ ।
ॐ કુઙ્કુમાગરુભદ્રશ્રીચર્ચિતાઙ્ગ્યૈ નમો નમઃ ।
ॐ સચામરામરીરત્નવીજિતાયૈ નમો નમઃ ।
ॐ પ્રણતાખિલસૌભાગ્યપ્રદાયિન્યૈ નમો નમઃ ।
ॐ દાનવાર્દિતશક્રાદિસન્નુતાયૈ નમો નમઃ ।
ॐ ધૂમ્રલોચન દૈતેયદહનાયૈ નમો નમઃ ।
ॐ ચણ્ડમુણ્ડમહાશીર્ષખણ્ડનાયૈ નમો નમઃ ।
ॐ રક્તબીજમહાદૈત્યશિક્ષકાયૈ નમો નમઃ ।
ॐ મદોદ્ધતનિશુમ્ભાખ્યભઞ્જનાયૈ નમો નમઃ ।
ॐ ઘોરશુમ્ભાસુરાધીશનાશનાયૈ નમો નમઃ ।
ॐ મધુકૈટભસંહારકારણાયૈ નમો નમઃ ।
ॐ વિરિઞ્ચિમુખસઙ્ગીતસમજ્ઞાયૈ નમો નમઃ ।

ॐ સર્વબાધાપ્રશમનચરિત્રાયૈ નમો નમઃ ।

ॐ સમાધિસુરથક્ષ્માભૃદર્ચિતાયૈ નમો નમઃ ।

ॐ માર્કણ્ડેયમુનિશ્રેષ્ઠસંસ્તુતાયૈ નમો નમઃ ।

ॐ વ્યાલાસુરદ્વિષદ્વિષ્ણુસ્વરૂપિણ્યૈ નમો નમઃ ।

ॐ ક્રૂરવેત્રાસુરપ્રાણમારણાયૈ નમો નમઃ ।

ॐ લક્ષ્મીસરસ્વતીકાલીવેષાઢ્યાયૈ નમો નમઃ ।

ॐ સૃષ્ટિસ્થિતિલયક્રીડાતત્પરાયૈ નમો નમઃ ।

ॐ બ્રહ્મોપેન્દ્રગિરીશાદિપ્રતીક્ષાયૈ નમો નમઃ ।

ॐ અમૃતાબ્ધિમણિદ્વીપનિવાસિન્યૈ નમો નમઃ ।

ॐ નિખિલાનન્દસન્દોહવિગ્રહાયૈ નમો નમઃ ।

ॐ મહાકદમ્બવિપિનમધ્યગાયૈ નમો નમઃ ।

ॐ અનેકકોટિબ્રહ્માણ્ડજનન્યૈ નમો નમઃ ।

ॐ મુમુક્ષુજનસન્માર્ગદર્શિકાયૈ નમો નમઃ ।

ॐ દ્વાદશાન્તષડમ્ભોજવિહારાયૈ નમો નમઃ ।

ॐ સહસ્રારમહાપદ્મસદનાયૈ નમો નમઃ ।

ॐ જન્મપ્રમુખષડ્ભાવવર્જિતાયૈ નમો નમઃ ।

ॐ મૂલાધારાદિષટ્ચક્રનિલયાયૈ નમો નમઃ ।

ॐ ચરાચરાત્મકજગત્સમ્પ્રોતાયૈ નમો નમઃ ।

ॐ મહાયોગિજનસ્વાન્તનિશાન્તાયૈ નમો નમઃ ।

ॐ સર્વવેદાન્તસત્સારસંવેદ્યાયૈ નમો નમઃ ।

ॐ હૃદિનિક્ષિપ્તનિઃશેષબ્રહ્માણ્ડાયૈ નમો નમઃ ।

ॐ રાજરાજેશ્વરપ્રાણવલ્લભાયૈ નમો નમઃ ।

ॐ તુષારાચલરાજન્યતનયાયૈ નમો નમઃ ।

ॐ સર્વાત્મપુણ્ડરીકાક્ષસહોદર્યૈ નમો નમઃ ।

ॐ મૂકીકૃતમહામૂકદાનવાયૈ નમો નમઃ ।

ॐ દુષ્ટમૂકશિરઃ શૈલકુલિશાયૈ નમો નમઃ ।

ॐ કુટજોપત્યકામુખ્યનિવાસાયૈ નમો નમઃ ।

ॐ વરેણ્યદક્ષિણાર્ધાઙ્ગમહેશાયૈ નમો નમઃ ।

ॐ જ્યોતિશ્ચક્રાસનાભિખ્યપીઠસ્થાયૈ નમો નમઃ ।

ॐ નવકોટિમહદુર્ગાસંવૃતાયૈ નમો નમઃ ।

ॐ વિઘ્નેશસ્કન્દવીરેશવત્સલાયૈ નમો નમઃ ।

ॐ કલિકલ્મષવિધ્વંસસમર્થાયૈ નમો નમઃ ।

ૐ ષોડશાર્ણમહામન્ત્રમન્દિરાયૈ નમો નમઃ ।
ૐ પઞ્ચપ્રણવલોલમ્બપઙ્કજાયૈ નમો નમઃ ।
ૐ મિથુનાર્ચનસંહૃષ્ટહૃદયાયૈ નમો નમઃ ।
ૐ વસુદેવમનોભીષ્ટફલદાયૈ નમો નમઃ ।
ૐ કંસાસુરવરારાતિપૂજિતાયૈ નમો નમઃ ।
ૐ રુક્મિણીસત્યભામાદિવન્દિતાયૈ નમો નમઃ ।
ૐ નન્દગોપપ્રિયાગર્ભસમ્ભૂતાયૈ નમો નમઃ ।
ૐ કંસપ્રાણાપહરણસાધનાયૈ નમો નમઃ ।
ૐ સુવાસિનીવધૂપૂજાસુપ્રીતાયૈ નમો નમઃ ।
ૐ શશાઙ્કશેખરોત્સઙ્ગવિષ્ઠરાયૈ નમો નમઃ ।
ૐ વિભુધારિકુલારણ્યકુઠારાયૈ નમો નમઃ ।
ૐ સઞ્જીવનૌષધત્રાતત્રિદશાયૈ નમો નમઃ ।
ૐ માતૃસૌખ્યાર્થિ પક્ષીશસેવિતાયૈ નમો નમઃ ।
ૐ કટાક્ષલબ્ધશક્રત્વ પ્રદ્યુમ્નાયૈ નમો નમઃ ।
ૐ ઇન્દ્રક્લૃપ્તોત્સવોત્કૃષ્ટપ્રહૃષ્ટાયૈ નમો નમઃ ।
ૐ દારિદ્ર્યદુઃખવિચ્છેદનિપુણાયૈ નમો નમઃ ।
ૐ અનન્યભાવસ્વર્ગાપવર્ગદાયૈ નમો નમઃ ।
ૐ અપ્રપન્ન ભવત્રાસદાયકાયૈ નમો નમઃ ।
ૐ નિર્જિતાશેષપાષણ્ડમણ્ડલાયૈ નમો નમઃ ।
ૐ શિવાક્ષિકુમુદાહ્લાદચન્દ્રિકાયૈ નમો નમઃ ।
ૐ પ્રવર્તિતમહાવિદ્યાપ્રધાનાયૈ નમો નમઃ ।
ૐ સર્વશક્ત્યૈકરૂપ શ્રીમૂકામ્બાયૈ નમો નમઃ ॥

ઇતિ મૂકામ્બિકાષ્ટોત્તરશતનામાવલિઃ સમ્પૂર્ણા ॥

Encoded by R. Harshananda harshanand_16@rediffmail.com

*Shri MukambikA Ashtottarashatanamavali*

pdf was typeset on April 18, 2020

Please send corrections to *sanskrit@cheerful.com*